संस्कृतवार्ता:

दिनाङ्क :- 01.05.2025 प्रात: - 06:55

**अथ वार्ता:**

**वेब्ससम्मेलनम्**

भारतम् अद्य समारप्स्यमाणस्य मुम्बईनगर्याम् जिओ-वर्ल्ड-कन्वेंशन सेण्टर-इत्येतस्मिन् स्थले प्रथमस्य ऑडियो-विजुअल-एण्टरटेनमेण्ट- वेव्स इत्येतस्य शिखरसम्मेलनस्य आतिथ्यं विधास्यति। प्रधानमन्त्रिणा नरेन्द्रमोदिना इदम् शिखरसम्मेलनम् उद्घाटयिष्यते। अयं चतुर्दिवसीय: कार्यक्रम: श्रव्य-दृश्य-मनोरञ्जनोद्योगानां भविष्ये चर्चार्थम् एकं वैश्विकं मञ्चं प्रदास्यति। अस्य सम्मेलनस्य प्रमुख: विषयो विद्यते-**कनेक्टिंग क्रिएटर्स कनेक्टिंग कन्ट्रीज** इति । प्रधानमन्त्री नरेन्द्रमोदी क्रिएट इन इन्डिया चैलेंज इत्येतस्मात् चितै: द्वात्रिंशत् सङ्ख्यकै: नवोन्मेषकै: संवादं साधयिष्यति ।

**प्रधानमन्त्री-प्रगतिसम्मेलनम्**

प्रधानमन्त्री नरेन्द्रमोदी ह्य: प्रगतिइत्येतस्य षड्चत्वारिंशत्तमस्य संस्करणस्य अध्यक्षताम् कृतवान्। एतस्मिन् सम्मेलने केन्द्रम् राज्य- प्रशासनानि च सम्मिल्य सकिर्यशासने ससमयं च कार्यान्वयनार्थम् आई.सी.टी. इत्येतस्य आधारितस्य बहुविध-प्रारूपगत-मञ्चस्य समीक्षा जाता। उपवेशनावधौ अष्ट-महत्वपूर्ण-परियोजनानाम् समीक्षा जाता। यासु तिस्र: मार्गपरियोजनाया: द्वे च रेलवे-जलपोतस्थानक-जलमार्ग-क्षेत्राणां च परियोजना: समाविष्टा: सन्तीति। विभिन्नेषु राज्येषु केन्द्रशासितप्रदेशेषु च विस्तृतानां एतासां परियोजनानाम् सम्पूर्णं व्ययं नवतिसहस्र-कोटि रूप्यकाणि यावदस्ति। प्रधानमन्त्रिणा निर्दिष्टं यत् मन्त्रालयै: विभागैश्च सुनिश्चीयते यत् लाभार्थिनाम् अभिज्ञानं बॉयोमैट्रिक इत्येतस्य जीवमितीय- आधारितस्य प्रमाणीकरणस्य च माध्यमेन सत्यापितम् भवेदिति।

**मन्त्रिमण्डलम्**

आगामि-जनगणनायाम् जातिगतगणनां समावेष्टुं प्रशासनेन निर्णय: निर्णीत:। प्रधानमन्त्रिण: नरेन्द्रमोदिन: अध्यक्षतायाम् राजनीतिक-कार्य-मन्त्रिमण्डलसमित्या अस्मिन् विषये निर्णय: प्रतिपादित:। वार्ताहरान् संसूचयता सूचनाप्रसारमन्त्रिणा अश्विनी-वैष्णवेन सूचितं यत् जातिगणना अग्रगामि-जनगणनायां समाविष्टा भवेदिति।

**मन्त्रिमण्डलम्/जातिगणना**

केन्द्रीयगृहमन्त्री अमितशाह: आगामि-जनगणनायां जातिगणनाया: समावेशनस्य निर्णयम् सामाजिक- समानताया: तथा च प्रत्येकस्य वर्गस्य अधिकारान् प्रति दृढप्रतिबद्धतां सन्देशरूपेण निराकृतवान्। अत्रावधौ केन्द्रीयमन्त्री शिवराजसिंह-चौहान: प्रतिपादितवान् यत् जातिगणना एषा पूर्णपादर्शितया सम्पद्यताम् इति । भाजपेतिदलस्य राष्ट्रियध्यक्ष: अवदत् यत् आर्थिकरूपेण सामाजिकरूपेण शैक्षाणिकरूपेण च अनुन्नत-जातिं मुख्यधारायाम् आनेतुं अपि च दीर्घकालान् यावत् अधिकारेभ्य: वञ्चितानां जनानां सम्मानं पुन: स्थापयितुं च अयं निर्णय: अतीव-महत्वपूर्णो विद्यते।

**भारत-पाकिस्तान-विमानक्षेत्रम्**

पहलगाम-आतङ्क्याक्रमणस्य अनन्तरं भारतम् पाकिस्तान-विमान-सेवाभ्य: स्ववायुपथम् अवरुद्धम् अकरोत्। मे-मासस्य त्रयोविंशति- दिनाङ्कपर्यन्तं एष: प्रतिबन्ध: प्रवर्तयिष्यति। नागरिकोड्डयन-मन्त्रालयेन सूचितं यत् अस्मिन् काले पाकिस्तानदेशीयानां विमान-संस्थानां स्वामित्वेन अनुबन्धितेन वा सञ्चालितै: सैन्यविमानैः सह प्रचालकै: वा सञ्चालितानि वायुविमानानि सम्मिलितानि इति ।

**<u>बाङ्ग्लादेश:/ चिन्मय् कृष्णदास:</u>**

बाङ्ग्लादेशस्य सर्वोच्चन्यायालयेन पूर्व-इस्कान्-भिक्षो: बाङ्ग्लादेशस्य **सम्मिलितो सनातनी जागरण् जोटे** इत्यस्य प्रवक्तु: च चिन्मय् कृष्णदासस्य देशद्रोह-प्रकरणस्य प्रतिभूतीकरणस्य प्रसङ्गे उच्चन्यायालयस्य आदेशः स्थगितः अस्ति। सर्वोच्चन्यायालयस्य याचिका- विभागस्य न्यायाधीशः, न्यायमूर्तिः रेज़ौल् हक् ए इत्येष: ह्यः उच्चन्यायालयेन तस्य विमुक्ते: कासाञ्चित: होरानाम् अनन्तरम् राज्य-अधिवक्त्रा कृतस्य अभ्यर्थनस्य श्रवणानन्तरं आदेश: दत्त:।

**<u>क्रिकेट:</u>**

आई.पी.एल्. इत्येतस्यां विंशति प्रति विंशति इत्येतस्यां क्रिकेट-स्पर्धा- मालिकायां ह्या: रात्रौ क्रीडिते द्वन्द्वे एम्. ए. चिदम्बरम्-क्रीडाङ्गणे पञ्जाब-किंग्स-दलेन चेन्नै-सुपर-किंग्स-इत्येद्दलं चतुर्भि: स्तोभै: पराजितम्। अद्य राजस्थान-रॉयल्स-मुम्बई-इण्डियन्स- इत्यनयो: दलयोर्मध्ये जयपुरे सवाई-मानसिंह-क्रीडाङ्गणे प्रतिस्पर्धा भविष्यति। क्रीडेषा सायं सार्धसप्तवादनतो क्रीडिष्यते ।

।। <u>इति वार्ता:</u>।।